*Metres with 7 Syllables in a quarter*

### ( उष्णिक् )

#### ( 1 ) कुमारललिता

Def. कुमारललिता ज् स् गाः ।
Sch. G. ज, स, ग ( 3. 4 ).
Ex. मुरारितनुवल्ली **कुमारललिता** सा ।
व्रजैणनयनानां ततान मुदमुच्चैः ॥

#### ( 2 ) मदलेखा

Def. मस्गौ स्यान्मदलेखा ।
Sch. G. म, स, ग ( 3. 4 ).
Ex. राज्ञे बाहुविरुणाद् दन्तीन्द्रान्**मदलेखा** ।
लमाभून्मुरशत्रौ कस्तूरीरसचर्चा ॥

#### ( 3 ) मधुमती

Def. ननगि मधुमती ।
Sch. G. न, न, ग ( 5. 2 ).
Ex. रविदुहितृतटे नवकुसुमततिः ।
व्यधित **मधुमती** मधुमथनमुदम् ॥

---

*Metres with 8 Syllables in a quarter*

### ( अनुष्टुभ् )

#### ( 1 ) अनुष्टुभ ( also called श्लोक )

There are several varieties of this metre, but that which is most in use has eight syllables in each quarter, but of variable quantity. Thus the fifth syllable of each quarter should be short, the sixth long, and the seventh alternately long and short.

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥
Ex. वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ R. 1. 1.

#### ( 2 ) गजगति

Def. नभलगा गजगतिः ।
Sch. G. न, भ, ल, ग ( 4. 4 ).
Ex. रविसुतापरिसरे विहरतो दृशि हरेः ।
व्रजवधू**गजगति**र्मुदमलं व्यततुत ॥

#### ( 3 ) प्रमाणिका

Def. प्रमाणिका जरौ लगौ ।
Sch. G. ज, र, ल, ग ( 4. 4 ).
Ex. पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः
श्रुतिस्मृति**प्रमाणिका** भवाम्बुराशितारिका ॥

#### ( 4 ) माणवक

Def. भात्तलगा माणवकम् ।
Sch. G. भ, त, ल, ग ( 4. 4 ).
Ex. चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम् ।
ध्याय सखे स्मेरमुखं नन्दसुतं **माणवकम्** ॥

#### ( 5 ) विद्युन्माला

Def. मो मो गो गो विद्युन्माला ।
Sch. G. म, म, ग, ग ( 4. 4 ).
Ex. वासोवल्ली **विद्युन्माला** बर्हश्रेणी शाक्रश्चापः ।
यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः ॥

#### ( 6 ) समानिका

Def. ग्लौ रजौ समानिका तु ।
Sch. G. ग, ल, र, ज ( 4. 4 ).
Ex. यस्य कृष्णपादपद्ममस्ति हृत्-तडागसद्म ।
धीः **समानिका** परेण नोचितात्र मत्सरेण ॥

---

*Metres with 9 Syllables in a quarter*

### ( बृहती )

#### ( 1 ) भुजगशिशुभृता

Def. भुजगशिशुभृता नौ मः ।
Sch. G. न, न, म ( 7. 2 ).
Ex. ह्रदतटनिकटक्षौणी **भुजगशिशुभृता** याऽसीत् ।
मुररिपुदलिते नागे व्रजजनसुखदा साऽभूत् ॥

#### ( 2 ) भुजङ्गसङ्गता

Def. सजरैर्भुजङ्गसङ्गता ।
Sch. G. स, ज, र ( 3. 6 ).
Ex. तरला तरङ्गरिङ्गितैर्यमुना **भुजङ्गसङ्गता** ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ॥

#### ( 3 ) मणिमध्य

Def. स्यान्मणिमध्यं चेद्भमसाः ।
Sch. G. भ, म, स ( 5. 4 ).
Ex. कालियभोगाभोगगतस्तन्**मणिमध्य**स्फीतरुचा ।
चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः ॥

---

*Metres with 10 Syllables in a quarter*

### ( पङ्क्ति )

#### ( 1 ) त्वरितगति

Def. त्वरितगतिश्च नजनगैः ।
Sch. G. न, ज, न, ग ( 5. 5 ).
Ex. **त्वरितगति**र्व्रजयुवतिस्तरणिसुता विपिनगता ॥
मुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥

#### ( 2 ) मत्ता

Def. ज्ञेया मत्ता मभसगसृष्टा ।
Sch. G. म, भ, स, ग ( 4. 6 ).
Ex. पीत्वा **मत्ता** मधु मधुपाली
कालिन्दीये तटवनकुञ्जे ।
उद्दीव्यन्तीर्व्रजजनरामाः
कामासक्ता मधुजिति चक्रे ॥